श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

सेवा श्री श्रीनिवासराघवार्य महादेशिक विरचितम्

# ॥ श्रीलक्ष्मीहयवदन मङ्गलम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुजमहादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीलक्ष्मीहयवदन मङ्गलम् ॥

मणिमण्डपिकास्थानीमण्डनाय महीयसे।
मङ्गलाभरणायास्तु तुरगास्याय मङ्गलम्॥ १ ॥

इन्दिरालिङ्गनानन्दनिधये निधये सताम्।
सुन्दराय सुपूर्णाय वाजिवक्त्राय मङ्गलम्॥ २ ॥

विरिञ्चिमुखदेवादिवेदव्याख्यानकारिणे।
व्याख्याङ्कितकरायास्तु वागधीशाय मङ्गलम्॥ ३ ॥

वाचि वेदश्रियं स्वान्ते कृपाश्रियं अपाङ्गयोः।
अनुग्रहश्रियं धर्त्रे हयशीर्षाय मङ्गलम्॥ ४ ॥

प्रपन्नाभयदायास्तु दिव्यदृष्टिप्रदायिने।
देशिकाराध्यदैवाय हयग्रीवाय मङ्गलम्॥ ५ ॥

ज्ञानानन्दसुखारोग्य भुक्तिमुक्त्यादिदायिने।
स्वाश्रिताय शरण्याय वाग्वरेण्याय मङ्गलम्॥ ६ ॥

गोदाशठारि भगवद्रामानुजमुखैस्सदा।
देशिकेन च युक्ताय नित्यं भवतु मङ्गलम्॥ ७ ॥

आत्रेयश्री श्रीनिवासराघवेणानु संहितम्।
श्रेयो ददातु पठतां श्रीहयानन मङ्गलम्॥ ८ ॥

॥ इति श्रीलक्ष्मीहयवदन मङ्गलं संपूर्णम् ॥